RISHIHRIDAYAM

R
S
V
L
00605

91:g
N
00605

KENDRIYA SANSKRIT VIDYA PEETHAM
TIRUPATI.
LIBRARY

91:9
N

॥ श्रीः ॥

605

ऋषिहृदयम् ॥

भासि भो लीयसे भासि लीयसे भासि लीयसे ।
लीला तवेयमस्माकं या स्थितिस्तां विचिन्तय ॥

यज्ञाङ्गभावमवधाय ऋचां तदेक-
दृष्ट्याऽर्थवर्णनमकुर्वत भाष्यकाराः ।
नैवातिविस्तरविवर्जनतत्पराणा-
मर्थान्तरं किमपि वक्तुमभूत्प्रवृत्तिः ॥

भाषाचरित्राद्युपपत्तिभूम्ना
पदप्रसङ्ख्यानपरा नवीनाः ।
सर्वार्थवेदित्वधियं वहन्ति
वाक्यार्थमार्गे तु बहु स्खलन्ति ॥

तदद्य शास्त्रेषु चिरन्तनेषु
ध्वनिक्रमेष्वप्युपसंभृतस्य ।
प्राचामृषीणां हृदयं विवृण्व-
न्नवन्ध्यतामाकलये श्रमस्य ॥

तत्र ऋक्संहिताया आदिमं सूक्तमद्य विव्रियते—

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारँ रत्नधातमम् ॥ १ ॥

अग्निम् । उद्रिक्तभक्तिपरिवाहरूपेयं तत्त्वज्ञस्य ऋषेर्देवविषया स्तुतिः । तावान् भक्तेरुद्रेको येन तन्नामकीर्तनमप्यतिमधुरं भवति । यथाऽऽहुः—

तत्त्वं ब्रुवाणानि परं परस्मा-
न्मधु क्षरन्तीव सतां फलानि ।
प्रवर्तय प्राञ्जलिरस्मि जिह्वे
नामानि नारायणगोचराणि ॥ इति ।

तस्मात् प्रथममेव नामग्रहणं अग्निं इति ।

ईळे । स्तौमि । अग्नेर्गुणानभिधास्यामीत्यर्थः । करिष्यमाणप्रतिज्ञेयं 'अवहितैः श्रोतव्य'मिति श्रोतॄणां प्रतिबोधनाय । 'अहो बत मम भाग्यं यत् स्तुत्यस्तुतिकरणेन कृच्छ्रलभ्याया वाचश्चारितार्थ्यं सम्पादयितुमपेक्षिते ये बुद्धिशक्ती ते सम्पन्ने स्तः' इति कृतकृत्यतामतिप्रयुक्तस्वात्मसन्तोषाविष्करणाय वा । इतरानपेक्षं एकैकेनापि स्तोतव्योऽग्निरित्यभिप्रायेण एकवचनम् ।

अथ कति गुणा अभिधास्यन्ते । चत्वारः । के ते । य इमे क्रमेणोच्यन्ते—

पुरोहितम् । पुरस्तान्निहितम् । कस्य पुरस्तात् । यज्ञस्य । नन्वेवमन्वये 'यज्ञस्य पुरोहितं' इति षष्ठ्यन्तं पूर्वं प्रायोक्ष्यत । न । उत्तरत्रापि बहुलं प्रयुज्यते । 'वयं स्याम पतयो रयीणाम्' 'जनना दिवो जनना पृथिव्याः' इति । अथ पादान्तरस्थस्य पूर्वपादस्थपदेनान्वयो नेति मन्यते, तदपि न । 'बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्' इत्यत्र महतो ज्योतिषः सकाशाज्जायमान इति भवतैव व्याख्यानात् । इह पञ्चमी, यज्ञस्येति तु प्रकृते षष्ठीति चेदनेन को विशेषः । तस्मात् 'महो महतः ज्योतिषो दीप्तस्यादित्यस्य परमे निरतिशये व्योमन्' इति भाष्यकारेण दर्शितमुत्तरत्रान्वयमुपेक्ष्य पूर्वत्रान्वयं ब्रुवतो नात्र 'यज्ञस्य पुरोहितम्' इति भाष्योक्तान्वयदूषणं युक्तम् । अर्थसारस्यात् तत्र तथाऽन्वय इति चेत् प्रकृते तादृशमर्थसारस्यं नास्तीति किं भवान् प्रतिजानीते । ओमिति

चेत् दर्शयिष्यमाणमवधाय मिथ्यैव सा प्रतिज्ञेति प्रतिबोद्धव्यमित्यलमधिकेन ।

देवम्। द्योतमानम् । यज्ञस्य द्योतनकारिणमिति तु ऋषेर्हार्दो भावः । इदमुत्तरत्र स्फुटीभविष्यति । 'देव इति ऋत्विजो विशेषणमिति तु न सम्यक् । 'देवो देवेभिरागमत्' इति साक्षादग्निविशेषणत्वस्यैव दर्शनात् इह विशेषणविशेषणत्वाङ्गीकारायोगात् । तथात्वे दिव्य इति दैव्य इति वा श्रवणस्योचितत्वात्। यज्ञस्येति षष्ठ्याः ऋत्विजमित्यनेनान्वयाङ्गीकारात् मध्ये स्थितस्य देवमित्यस्यापि तत्रान्वयाङ्गीकारनिर्बन्धो जायत इतीयमपराऽनुपपत्तिः पाश्चात्यस्य व्याख्यान इति द्रष्टव्यम् ।

होतारमृत्विजम्। यज्ञे यजमानेन क्रीताः कर्मकरा ऋत्विज उच्यन्ते । तेष्वेको होतृनामा । यस्मादयं देवान् यज्ञदेशं प्रत्याह्वयति । तदिह 'रजतं हिरण्यं' 'सुवर्णं हिरण्यं' इतिवत् सामान्यविशेषशब्दयोः सह प्रयोगः, न तु पृथग्विशेषणद्वयमिति मन्तव्यम् । बृहदारण्यके अश्वलं प्रतिब्रुवतो याज्ञवल्क्यस्य वचनेषु 'होत्वर्त्विजा' 'अध्वर्युणार्त्विजा' 'उद्गात्वर्त्विजा' 'ब्रह्मणर्त्विजा' इति स्थितमपि परामर्शनीयम् । अत्र पदद्वयस्य भिन्नपादस्थत्वं क्रमान्तरं च छन्दोनुरोधादिति ततो न कश्चिद्विशेषः । यज्ञस्येत्येतदत्रापि सम्बध्यत इत्यनुक्तमपि गम्यत एव ।

रत्नधातमम्। रत्नानि रतिकराणि अभिलषितानि यज्ञफलानि । तेषामतिशयेन धारयितारं पोषयितारं वा । सर्वयज्ञफलदातारमित्यभिप्रायः ।

त इमे चत्वारो गुणा उद्दिष्टाः । तत्र ऋषेरयं भावः । अग्निराराध्यो देवः । आराधनं कर्म यज्ञः । स्वनुष्ठितेन यज्ञकर्मणा अग्निर्देव आराधितो भवति । तस्यैतस्य यज्ञकर्मणः शोभनमनुष्ठानमपि तदनुग्रहैकायत्तम् । यज्ञस्य प्राग्वर्तमानपश्चात्कालेषु त्रिष्वपि अग्नेर्देवस्य अनुग्रहोऽपेक्षितः । तत्र प्राक्कालेऽपेक्षितत्वं यज्ञस्य पुरोहितमित्यनेनोक्तम्। वर्तमान-

कालेऽपेक्षा द्वेधा—असुराद्युपघाताद्रक्षणाय यज्ञस्वरूपनिर्वर्तनाय च । तत्रा-द्यामपेक्षामभिप्रेत्योक्तं देवमिति । द्वितीयामभिप्रेत्य होतारमृत्विजमिति । पश्चात्कालेऽपेक्षितत्वं 'रत्नधातमं' इति चरमविशेषणेनोक्तमिति ॥

एवं प्रथममन्त्रे, अग्निः स्तुतिक्रिया चत्वारि विशेषणानीति षट् पदार्था उक्ताः । तत्राग्निशब्दवाच्यदेवताविशेषस्वरूपं प्रति विस्तरेण किमपि वक्तव्यं नास्ति । यत्तु 'ईळे' इत्युक्तं तत्र स्यादाशङ्का—क्व स निरतिशयमाहिमशाली प्राक्तनैर्महात्मभिः स्तुतो भगवानग्निः । क्व च भवानद्यतनः परिमितप्रज्ञाशक्तिविभवः । सर्वथा भवतोऽत्र प्रवृत्तिरनुचिता—इति । तत्रायमृषिर्मन्यते ममाप्ययं देवः स्तोतुमर्ह इति । एतद्व्यञ्जनायैव अग्निमीळे इत्यनन्तरमेव क्रियाप्रयोगः । तादृशमप्यग्निं ईदृशोऽप्यहं स्तौमीति । अन्यथा देवो 'देवेभिरागमत्' इत्यादिवत् स्वस्थान एव प्रायोक्ष्यत । तदिदं समाधानं प्रस्फुटमृषिः प्रतिपादयति—

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ।
स देवाँ एह वक्षति ॥ २ ॥

देवोऽग्निः पूर्वैर्ऋषिभिः विलक्षणप्रज्ञाशक्तिशालिभिरीड्यः । नूतनैश्च मयाऽन्यैश्च ईड्य इत्यनुषज्य योजनीयम् । यदत्र पूर्वैर्नूतनैश्च ईड्य इत्येकवाक्यता क्रियते तदपेक्षया वाक्यभेदाश्रयणमेव श्रेयः । सिद्धस्य साध्यस्य चार्थस्य पृथक्प्रतिपादनं हि युक्तमिति । यदपि 'नूतनैश्च ऋषिभिः' इत्यत्रापि ऋषिपदसम्बन्धनं तदपि चिन्त्यम् । विवक्षितार्थविरुद्धत्वात् । पूर्वेषां प्रज्ञाशक्तिपौष्कल्यं, नाद्यतनानामस्माकम् । एवंविधानामपि नः स्तुत्योऽग्निरिति ह्यत्र विवक्षितम् । तत्र नूतनानामपि ऋषित्वे उक्ते पूर्वेषामिव एषामपि स्तुतिकरणेऽधिकारसम्पत्तिरुक्ता भवति । तथा सति अनधिकारशङ्काया एव न प्रसक्तिः । कुतः समाधानस्य । अत एव भाष्यकारैः 'इदानींतनैर-

स्माभिरपि' 'अस्माभिश्च नवतरैः' इत्येवमेव भाषितमिति सुसूक्ष्मं परिशीलनीयम् ।

ईड्योऽसीत्याख्यातमत्र न प्रयुज्यते, यतः 'पूर्वैरीड्योऽसि' इत्यन्वितमिव भवति । आसीरिति तु प्रयुज्यमानं 'नूतनैरुत' इत्युत्तरत्र नान्वेति । तद्यथोचितमत्र बोद्धारो भोत्स्यन्त इति बुद्धिपूर्वमृषेराख्यातोपेक्षणमित्यवधेयम् ।

सः अग्निः देवान् यजनीयानिन्द्रादीन् इह यजनप्रदेशे आवक्षति आवक्ष्यति प्रापयिष्यति ।

इदमिह मीमांस्यते । एकस्तावदयं मन्त्रः 'अग्निः पूर्वेभिः' इत्यारभ्य 'वक्षति' इत्येतदन्तः । तस्मात् एकेनार्थेन भवितव्यम् । तत्र तृतीयपादे पृथगाख्यातश्रवणादर्थभेदप्रतीतावपि पूर्वेण सह वाक्यैकवाक्यतां कृत्वा अर्थैक्यं सम्पादनीयम् । एवमेकवाक्यत्वाय पूर्वोत्तरवाक्यार्थयोर्मिथो विशेषणविशेष्यभावे वाच्ये कस्य विशेष्यत्वं युक्तं कस्य विशेषणत्वमिति । तत्र उत्तरवाक्ये स इति तच्छब्दश्रवणात् यत्तदोर्नित्यसम्बन्ध इति न्यायेन कल्पनीयस्य यच्छब्दस्य पूर्वत्रैव कल्पनीयत्वात् य ईड्यः स वक्षतीति पूर्वस्य वाक्यस्य विशेषणत्वमुत्तरस्य विशेष्यत्वं च प्रतीयते । अपि च क्रतुमध्ये अग्निं प्रति प्रयुज्यमानस्यास्य मन्त्रस्य यज्ञोपयुक्तदेवावहनप्रार्थनापरत्वमवश्यम्भावि । तस्मादेवमेव भाष्यकारेणाभाषि ।

वयं पुनः सूक्तमिदं स्वनिष्ठं कृत्वा पूर्वोत्तरपरामर्शेन मन्त्रार्थमन्विष्यन्तोऽन्यथैवात्र ऋषेराभिप्रायं स्थितमाकलयामः । अवतारिकोक्तशङ्कासमाधानमत्र चिकीर्षितम् । यस्य निरवधिर्महिमा तं देवमग्निं स्तोतुं प्राञ्च ऋषयः शक्ता नार्वाचीना भवादृशा इति ह्याशङ्का । तत्र समाधानं विवक्षन् ऊर्जितं प्रतिजानीते पूर्वार्धेन 'अग्निः प्राचीनैर्ऋषिभिरीड्यः नूतनैश्चेति । यथा प्राचां तथार्वाचामपि स्तुत्य एवाग्निः । अस्तुत्य इति कथमपि शङ्का

न कार्येति भावः । ननु—यो महद्भिः स्तुत्यः सोऽल्पैरपि स्तुत्य इति कथमेतत् । काऽत्रानुपपत्तिरिति चेत् स्तुतेरसमग्रा असमीचीना च भविष्यतीतीयमेवानुपपत्तिः । अल्पप्रज्ञा हि न सर्वान् गुणानभिधातुमीशते नापि यथावत् इति । एवमस्तु । तथाऽपि तु दोषः कः । असमग्राऽपि असमीचीनाऽपि स्तुतिरेव हि कृता भवतीति चेत् नैतदेवम् । ईदृशी खलु स्तुतिर्नियतं देवस्य क्रोधाय कल्पेत । यस्य ह्यनन्ता गुणा अनुत्तमाश्च तस्य त्रिचतुरेषु गुणेष्वयथावदुक्तेषु कथंकारं क्रोधो न भवेत् । तस्मान्नूतनैरल्पप्रज्ञैर्नेड्यो देवोऽग्निरिति—। अत्र ऋषिरेवं समाधित्सति । देवस्याग्नेः स्वभावं ये न जानन्ति तैरेवतैवं शङ्क्येत । न खल्वसावाश्रितेषु कथमपि क्रोधं करिष्यति । तस्य ह्याप्तकामस्य यथावत्कृतया स्तुत्या वृद्धिः काचिन्न भवितुमर्हति अयथावत्कृतया वा हानिः काचित् । प्राचीनैर्विचक्षणैः समग्रायां स्तुतौ यथावत् कृतायां स्वानुरूपा स्तुतिरेतैरकारीति तेषु दयाञ्चक्रे । तद्वदेव नूतनैरपि अकुटिलहृदयं कृतायां स्तुतौ, यथाकथंञ्चिदपि सत्यां तस्यां, दयां करिष्यत्येव । कुटिलहृदयेषु द्विषत्सु देवः क्रोधं करोति न तु भजमानेषु केषुचिदपि कदाचिदपि । प्रसादैकशीलत्वाद्देवस्येति । तदिदं प्रसादैकशीलत्वं तस्यापि मूलं दयालुत्वं च फलमुखेन प्रकाशयति 'स देवानिह आवक्ष्यति' इति । यस्मान्नूतनैरपि स्तुतः स देवानावक्ष्यति तस्मात्तैरपि स्तुत्य इति पूर्वेण प्रधानवाक्येन सताऽस्यैकवाक्यतोक्ता भवतीति ।

देवावहनद्वारा अविकलकृत्स्नयज्ञानुष्ठापनं ततोऽपि कांक्षितसर्वार्थसंपादनं चोपलक्षयति । अग्निं भक्त्या यथाशक्ति स्तुत्वा ततः सर्वान् कामानवश्यमेव जनो लभत इति भावः । देवस्य प्रसादस्तत्साधनं यजनमित्येतदर्थतया परं कामान्तराणि, न स्वप्रधानतयेति तु ज्ञातव्यम् ।

एवं 'निर्विश्यमानविभवं निगमोत्तमाङ्गैः स्तोतुं क्षमं मम च देवपते भवन्तम्' इति श्रीवेङ्कटनाथेन, 'स्वकैर्गुणैः स्वैश्चरितैः स्ववेदनाद्भजन्ति ये त्वां त्वयि भक्तिनोऽथवा । करीश तेषामपि तावकी दया तथात्वकृत् सैव तु मे वलं मतम्' इति श्रीवत्साङ्कमिश्रेण चोपबृंहितरीत्या प्राचां स्तुतिभजनादिषु परिपूर्णोऽधिकार इति कृत्वा समाधानाभिप्रायो वर्णितः । अथ यत् भगवता यामुनमुनिना—

तत्त्वेन यस्य महिमार्णवशीकराणुः
शक्यो न मातुमपि शार्ङ्गधनुर्धरैस्ते ।
कर्तुं तदीयमहिमस्तुतिमुद्यतोऽयं
मह्यं नमोऽस्तु कवये निरपत्रपाय ॥



इति स्वस्य भगवत्स्तुतावनधिकारं प्रथमतः प्रतिपाद्य, पश्चात्—

यद्वा श्रमावधि यथामति वाप्यशक्तः
स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः ।
वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः
को मज्जतोरणुकुलाचलयोर्विशेषः ॥

इति स्वस्माद्विशिष्टानामपि निरतिशयभगवन्महिमवर्णनविषये तुल्यतैवेत्यभिहितं तत्र प्रकारान्तरेणोपबृंहणं कृतं भवतीति तदनुसारेण 'देवस्याग्नेः स्तुतौ प्राज्ञोऽपि न पारं गताः । अपरिच्छिन्नत्वात्तदीयस्य महिम्नः । अथापि तु यथाशक्ति तेऽस्तुवन् । तथैव नूतना अपि स्तोतुमर्हन्ति । देवो हि तेष्विव एष्वप्यवश्यं दयां करिष्यति, मनोरथं पूरयिष्यति' इत्यप्यभिप्रायो वक्तुं शक्यः ।

तदेवं यस्मात् स देवानिहावश्यं आवक्ष्यति तस्मान्नूतनैरपीड्य इति पूर्ववाक्यस्य विशेष्यत्वं उत्तरस्य विशेषणत्वं च कृत्वा एकवाक्यताकरणं

समञ्जसमिति प्रदर्शितं भवति । न च यत्तदोर्नित्यसम्बन्धात् पूर्वस्मिन् वाक्ये यच्छब्दाध्याहारस्य कर्तव्यत्वेन तस्य विशेषणत्वमनिवार्यमिति वाच्यम् । हेतुवन्निगदाधिकरणविषये 'शूर्पेण जुहोति । तेन ह्यन्नं क्रियते' इत्यत्र तच्छब्दघटितस्योत्तरवाक्यस्यैव पूर्वशेषत्वदर्शनात् ॥ २ ॥

एवं 'ईडे' इति प्रतिज्ञातेऽर्थे उदिता शङ्का परिहृता । अथ क्रमेण चत्वार्यपि विशेषणानि विवृणोति । तत्र प्रथमेन यज्ञस्य पुरोहितमित्यनेन विवक्षितमर्थं प्रकाशयति—

अग्निना रयिमश्नवत् पोषमेव दिवे दिवे ।
यशसं वीरवत्तमम् ॥ ३ ॥

लोके पुरुषोऽग्निना रयिं धनं अश्नवत् अश्नोति समग्रं लभते । कीदृशं रयिम् । दिवे दिवे पोषमेव दिने दिने वर्धमानमेव न तु कदाचिदपि क्षीयमाणम् । यशसं यशोयुक्तम् । उत्तरोत्तरयज्ञानुष्ठानप्रवर्तनेन यशस्करमित्यर्थः । वीरवत्तमं स्वानन्तरमपि सन्ततयज्ञानुष्ठानकुशलपुत्रपौत्रादिपुंसन्तानयुक्तमिति ।

इह जातस्य पुरुषस्य यज्ञानुष्ठानं स्वधर्मः । तद्वर्जने अकृतकृत्यता अनार्यता भवति । सोऽयमवश्यमनुष्ठातव्यो यज्ञः कथमनुष्ठीयेत यदि तदुपयुक्तसकलसंभारसंभरणसाधनं धनं न स्यात् । तद्धनं देवस्याग्नेरेव प्रसादेन लभ्यते । इदमुक्तं 'अग्निना रयिमश्नवत्' इति । एतन्मूलकमेव स्मरणं 'धनमिच्छेद्धुताशनात्' इति । एवं यज्ञारम्भात् प्राक् तदुपयोगिधनहेतोः पुरस्क्रियमाणत्वात् यज्ञस्य पुरोहित इत्युच्यत इति ऋषिणा स्वाभिप्राय इह विवृतः । अद्यत्वे पुरोहितशब्दस्य यस्मिन्नर्थे प्रसिद्धिस्तस्येह न कथमपि सङ्गतिरिति ज्ञेयम् । येन समालोच्य यस्योपदेशमनुसृत्य कर्तव्यं कर्म क्रियते स एव समालोचनाय उपदेशकरणाय च पुरस्तान्निधीयमानत्वेन

पुरोहित इत्यभिधानं लभते । एवंविधः पुरोहितो बृहस्पतिरिन्द्रस्य, वसिष्ठ इक्ष्वाकुवंशस्य । यथा कर्तव्यकर्मविवेकस्तदनुष्ठानात् पूर्वमपेक्षितः तथा तदुपयुक्तं धनमपीति तदर्थं प्रथमत उपसर्पणीयस्याग्नेर्दैवस्य पुरोहितत्वमिह प्रतिपाद्यते । अन्यथा कथमत्र मध्ये धनलाभहेतुत्वमग्नेरभिधीयमानं सङ्गतं स्यादिति सुधीभिः पर्यालोचनीयम् ।

न परं धनस्य लाभोऽग्निहेतुकः । अपि तु दिने दिने तस्य वृद्धिरपि तद्धेतुका । अन्यथा लब्धमपि धनमचिरात् क्षीयेत ॥ तथा लब्धस्य धनस्य यजनकर्मसु विनियोगोऽपि तदनुग्रहायत्तः । तदनुग्रहविरहे धनसमृद्धिर्मदं जनयेत् । ततोऽश्रद्धा कर्मणि । ततोऽयथावदनुष्ठानमननुष्ठानमेव वा । ततो महदयश इति भवेत् । तस्माल्लब्धस्य धनस्य साधुकर्मसु विनियोगोऽपि तदनुग्रहायत्त इति सम्यगेतत् ॥ अथ च कृत्स्ने स्व आयुषि यजनपरैर्भूयत इति तावन्मात्रेण पुरुषाणां कृतकृत्यता न भवति । 'यज्ञो वै भुवनस्य नाभिः' । यज्ञाधारः सर्वो लोकः । तस्मिन्नसति निराधारः सर्वो नश्येत् । तत्र केनचित् यज्ञं साध्वनुतिष्ठता देवप्रीणनद्वारा—

'निकामे निकामे नः पर्जन्यो वर्षत्वित्याह ।
निकामे निकामे ह वै तत्र पर्जन्यो वर्षति ।
यत्रैतेन यज्ञेन यजन्ते ॥
फलिन्यो न ओषधयः पच्यन्तामित्याह । ९।१।१
फलिन्यो ह वै तत्रौषधयः पच्यन्ते । N
यत्रैतेन यज्ञेन यजन्ते ॥
एष वै दीर्घो नाम यज्ञः ।
दीर्घायुषो ह वै तत्र मनुष्या भवन्ति ।
यत्रैतेन यज्ञेन यजन्ते ॥
एष वै क्लृप्तो नाम यज्ञः ।

ORIYA SANSKRIT VIDYA TIRUPATI. LIBRARY

कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः ।
यत्रैतेन यज्ञेन यजन्ते ॥'

इति तैत्तिरीयाश्वमेधब्राह्मणोक्तन्यायेन सर्वदेशयोगक्षेमसंविधानं कृतं भवति । परं तु चिरमपि जीवितवता तेनावश्यं मर्तव्यं भवति । तेन मृते तस्मिन् ततःपरमपि सर्वजनयोगक्षेमसम्पादककुलधर्मयज्ञानुष्ठानानुवृत्तये अविच्छिन्ना पुरुषसन्ततिरपेक्षिता । इयमपि देवस्याग्नेरनुग्रहैकसाध्या ॥ तदेतदर्थत्रयं पोषमेवेत्यादिना विशेषणत्रयेण विवक्षितम् ।

अरुणाधिकरणन्यायेन 'अग्निना पोषमेवाश्नवत्' 'यशसमेवाश्नवत्' 'वीरवत्तममेवाश्नवत्' इति साक्षात् क्रियान्वयलाभात् सर्वमग्न्यधीनमित्यर्थः शब्दत एव सिद्ध्यति ।

एवमत्र अर्थोऽपि यज्ञार्थः सन्तानोऽपि यज्ञार्थ इति यत् स्थितं तदेव महाकविना—

"स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥"

इत्यंशतो वैलक्षण्येनोपबृंहितमिति प्रतीयते ॥ ३ ॥

अथाद्य यज्ञस्य देवमित्यनेन द्वितीयेन विशेषणेन विवक्षितं विशदीकरोति—

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ॥ ४ ॥

इति । हे अग्ने यं अध्वरं हिंसारहितं वैकल्यशून्यं, यज्ञं, त्वं, विश्वतः सर्वतः, यज्ञदेशं यज्ञकालं च कृत्स्नमभिव्याप्येत्यर्थः, परिभूः परितः स्थितवान्, असि, स इत् स एव, देवेषु गच्छति देवान् प्राप्नोति । यज्ञस्य विपत्तिर्द्वेधा यजमानर्त्विजां प्रमादात् रक्षसामुपघाताद्वा । तत्र आद्यायाः परिहारोऽग्निना कर्तव्योऽध्वरपदेनाभिप्रेतः । द्वितीयायाः 'विश्वतः परिभूरसि' इत्यनेन ।

एवं चानुष्ठातृणां यथा प्रमादो न स्यात् तथा तेषां बुद्धिसामर्थ्यप्रदानेन, घातुकानां रक्षसां विनिवारणेन च रक्षणं कृत्वा यज्ञस्य उद्दिष्टदेवताप्रीतिजननयोग्यतापादनादग्निर्यज्ञस्य देवो भवतीति भावः । नरदेव इति रक्षके देवशब्दः संप्रति प्रसिद्धः । स पूर्वमपि तथाऽऽसीदिति ज्ञायते ॥ ४ ॥

अग्निमीड इति प्रतिज्ञाय तदीयान् गुणान् प्रकाशयितुं प्रवृत्त ऋषिः यदा तदाराधनरूपयज्ञकर्मोपयुक्तधनसम्पत्तयेऽपि स एव पुरतो निधेय इत्येवंरूपपुरोहितत्वगुणमग्निः सन्निहितेभ्यो जनेभ्यः प्रकाशयन्ननुसन्दधे तदैव स भक्त्युद्रेकविह्वलचेताः समपद्यत । यदा पुनः अतिजागरूकैरपि मनुष्यैः परिहर्तुमशक्यानां यज्ञच्छिद्राणां पूरणमपि तेनैव कर्तव्यमिति तादृशं रक्षकत्वं तन्मूलं दयालुत्वं चानुसन्धातुमारभत तदा सद्योभूताद्भावनाप्रकर्षात् पुरत एव साक्षाद्विद्यमानमग्निममन्यत । तेन च तमेव सम्बोद्धय विवक्षितं गुणं ज्ञापयामास 'अग्ने यं यज्ञमध्वरं' इति । ततस्तु किञ्चित् प्रकृतिमापन्नः यथापूर्वं प्रथमपुरुषेणैव व्यवहरन् 'यज्ञस्य होतारमृत्विजं' इतीदं तृतीयं विशेषणं विस्तृणीते--

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।
देवो देवेभिरागमत् ॥ ५ ॥

इति । कविक्रतुः लोकातिक्रान्तप्रज्ञः । कविः क्रान्तः क्रतुः प्रज्ञा यस्येति । स्वरूपे वाचि कर्मणि ज्ञाने सङ्कल्पे चेति सर्वप्रकारेण सत्यः अन्यथाभावरहितः । चित्राणि श्रवांसि श्रवणानि कीर्तयो यस्य स चित्रश्रवाः । सर्वानतिशय्य तथाभूतः चित्रश्रवस्तमः । एवम्भूतो देवोऽग्निर्होता देवेभिः यज्ञे येभ्यो हविः प्रदेयं तैः सह आगमत् आगच्छति । 'आशंसायां भूतवच्च' इति वा लुङ् ।

अग्निर्होतृरूप ऋत्विग्भवति । कस्मादिति चेत् यस्मात् देवैः सह यज्ञप्रदेशमागच्छति । हविर्ग्रहणाय तान् यज्ञदेशमानयतीत्यर्थः । होतु-

हींदं कार्यं यद्देवानां यष्टव्यानामाह्वानमिति । तद्यतोऽग्निना देवेन क्रियते ततोऽयं होतेति ।

ननु यजमानेन वृतो मनुष्योऽपि होता भवति । तथाभावो यद्यग्नेरपि तावता तस्य को विशेषः । कथमेतत्कथनेनाग्निः स्तुतो भवति । प्रत्युत निकृष्टधर्मयोगादपकर्षप्रसङ्गः । अत्र समाधित्सुर्विशेषणान्युपादत्त । सर्वज्ञोऽयमग्निर्होता अस्मिन् देशे काले अस्य यजमानस्येदं कर्तव्यमिति इत्थं कर्तव्यमिति ज्ञातुमीशः । न तु मनुष्यहोतेव यथाकथञ्चिदधीतकतिपयमन्त्रपदमात्रप्रयोगेण कृतार्थमानी पदे पदे सम्भवत्प्रमादः॥ सर्वप्रकारेणायमग्निर्होता सत्यः । अनेन सङ्कल्पितं यत्किमपि नान्यथा भविष्यति । अस्वाधीनस्य वस्तुनः, स्वसङ्कल्पविघातकारिणः समस्याधिकस्य वा कस्यचिच्चेतनान्तरस्य वाऽभावात् । तदेवं सत्यः कविक्रतुरित्याभ्यां द्वाभ्यां विशेषणाभ्यां 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यत्र सत्यज्ञानपदाभ्यां विवक्षितं ब्रह्मलक्षणमेवाभिप्रेतमिति भाति॥ चित्राणि नैकविधानि विस्मयावहानि च श्रवांसि । कीर्तनैर्लोकेन क्रियमाणैः कार्यभूतैः तत्कारणभूता अग्नेरनुत्तमा गुणा लोकोत्तराणि कर्माणि च लक्ष्यन्ते । दया क्षमा वात्सल्यं सर्वशक्तत्वं इत्यादीन् तदीयान् गुणान् , उपघातुकानां बलिष्ठानां रक्षःप्रभृतीनां हिंसनं ज्योतिषां प्रकाशनं अपां वर्षणं एवमादिप्रकारेण सर्वलोकपरिपालनमितीमानि कर्माणि च सप्रीतिविस्मयबहुमानातिशयमनुपन्दधाना अभिज्ञाः सर्वदा तमेव कीर्तयन्तस्तन्माहात्म्यं परितः श्रावयन्तीति भावः । तदेवमेतैर्विशेषणैः परत्वसौलभ्ययोः काष्ठा देवेऽग्नौ वर्तत इति तादृशोऽयं होता न सामान्य इति सुशोभनः स्तवः ।

देवो देवेभिः । मन्त्रोच्चारणातिरिक्तं मनुष्यो होता न किमपि कर्तुं शक्नोति । अयं तु होता देवः सन् अन्यान् अपेक्षितवान् सर्वान् देवानवश्यमानेष्यति । तदधीनत्वात्सर्वेषामन्येषां देवानाम् । अनेनाभिप्रायेण देवो देवेभिरिति समभिव्याहारः । देवेभिरित्यत्र 'सहयुक्तेऽप्रधाने' इति

तृतीया । तेन देवान्तराणामशेषाणामप्राधान्यं प्रतीयते । तस्मादग्नि-वशवर्तिनोऽन्ये देवा इति सिद्ध्यतीति ।

छन्दोनुरोधात् भिस् वा ऐस् वा तृतीयाबहुवचनम् । 'अग्निः पूर्वेभिः .... नूतनैरुत' इति पूर्वमन्त्रे उभयं प्रयुक्तम् । छन्दस एवानुरोधेन ।

होतृपददर्शनरूपविशेषलिङ्गादस्य मन्त्रस्य 'होतारं रत्नधातमम्' इति प्रथममन्त्रनिर्दिष्टं यत् 'होतारं' इति विशेषणं तद्विवरणपरत्वं सुस्फुटं प्रकाशते । इतः प्राक्तने 'अग्ने यं यज्ञमध्वरं' इत्यस्मिन् मन्त्रे 'यज्ञस्य देवमृत्विजम्' इति प्रथममन्त्रस्थदेवपदविवक्षितार्थविवरणं क्रियत इति प्रदर्शितम् । यत्पुनरिह 'ऋत्विजम्' इति पदं तदर्थविवरणाय न मन्त्रान्तरं दृश्यते । तेनापि 'होतारमृत्विजम्' इतीदमेकमेव विशेषणमिति यत्प्रागुक्तं तत्तथैवेति निश्चीयते । तस्माद्विशेषणान्तरत्वनादिनो न ऋषिहृदयविद इति ज्ञेयम् ॥

अथ 'रत्नधातम'मिति चरमविशेषणगतं किञ्चिदाह—

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।
तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥

अत्र माधवभाष्यम्—"अङ्गेति निपातोऽभिमुखीकरणे । क्षिप्रनामेति यास्कः । यदङ्ग दाशुषे यजमानाय । दाशतिर्दानकर्मा । अग्ने भद्रं करिष्यसि ऋत्वन्ते । भद्रं भजनीयम् । 'यद्वै पुरुषस्य वित्तं तद्भद्रम् । गृहा भद्रम् । प्रजा भद्रम् । पशवो भद्र'मिति शाट्यायनकम् । तवैव तत्सत्यमङ्गिरः । अन्यस्तु देवः कृतं विस्मरेदपि । .... " । माधवान्तरभाष्यं च— 'यत् त्वं क्षिप्रमग्ने हविः प्रयच्छतेऽनन्तरमेव कल्याणं करिष्यसि । तवैव तत्सत्यमङ्गिरः । त्वमेकः (कृतज्ञः ?) अन्यस्तु कृतं विस्मरत्यपि ॥'

अन्योऽपि देवः कामं रत्नधा अस्तु । तथाऽपि न त्वादृशः कश्चित् ।

अन्यः सर्वोऽपि हि त्वत्तोऽवरः । परिच्छिन्नविभवत्वात् । यदा फलं दातव्यम् तदा स्वाधिकारप्रच्यवात् अन्यो देवो न स्यादपि । त्वं तु न तथा । स्वरूपतोऽपि सत्यत्वेन नाशादिविकारविरहेण शाश्वतत्वात् । एवं यस्मान्नियमेन फलप्रदत्वं तवैव नान्यस्य , तस्मात् त्वं रत्नधातम इति । इदमुपबृंहितं श्रीवेङ्कटनाथेन—

क्षणविलयिनां शास्त्रार्थानां फलाय निवेशिते
पितृसुरगणे निर्वेशात्प्रागपि प्रलयं गते ।
अधिगतवृषक्ष्माभृन्नाथामकालवशंवदां
प्रतिभुवमिह व्याचख्युस्त्वां कृपे निरुपप्लवाम् ॥

इति । सायणस्तु 'यद्भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तद्भद्रं तवेत् तवैव । सुखहेतुरिति शेषः । हे अङ्गिरः अग्न एतच्च सत्यम् । यजमानस्य वित्तादिसम्पत्तौ सत्यामुत्तरकर्त्वनुष्ठानेनाग्नेरेव सुखं भवति ।' इत्यभाषिष्ट । तत्र देवस्तुतिप्रकरणे स्ववित्तादिनिवेदनस्य नातीव सङ्गतिरिति भाति । यशसं वीरवत्तममित्यत्रास्यार्थस्य लब्धत्वादिहानपेक्षा च । एवमपि व्याख्यानं सुकरमिति प्रदर्शनमात्रतात्पर्येण तु प्राक्तनभाष्योक्तमनुक्त्वा अध्याहारेणाप्येवं भाषितम् ।

क्षणं प्रकृतिं गतमपि नियमेन कांक्षितसर्वफलप्रदत्वं तदुपयुक्तांश्च सर्वानन्यानसाधारणगुणाननुसन्धातुं प्रवर्तमानमृषिं पुनर्भक्तिर्गाढमाविशन्ती देवमग्निं तस्य पुरस्तात्प्रादुर्भावयामास । तस्मादितःप्रभृति सम्बोधनप्रयोगः । तत्राप्यस्मिन् मन्त्रे प्रतिपादमेकस्य सम्बोधनस्य प्रयोगो भक्त्यावेशस्यातिप्रकर्षं गमयति । भवति हि भक्त्युद्रेकः सम्बोधनमालाग्रथनहेतुः । यथा—

स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देव देव जगत्पते ॥ इति ।

तत्र अङ्गेत्ययं निपातः सम्बोद्धव्यसम्बोधकयोर्मिथः परिचयाधिक्यं गाढप्रेम-

वन्यशालित्वं च व्यनक्ति । अतिप्रवृद्धभक्त्यावेशविद्रुतप्रशिथिलहृदय ऋषिः स्वस्मिन्नुद्वेलवात्सल्यशालिनं देवमग्निं निपातेन सम्बोधयति अङ्गेति ।

दाशुषे । हविर्दत्तवते भद्रं करोत्यग्निः । नान्यस्मै । स हि देवश्चेतनानामनुभाव्यतया सुखदुःखे तत्साधनतया धर्माधर्मौ च स्वतन्त्रस्वसङ्कल्पेन परिकल्प्य धर्ममाचरतां सुखं अन्येषामन्यच्च प्रदिशन् लीलारसमनुभवति । तत्र यद्ययजमानायापि सुखं दद्यात् तर्ह्यविशेषात् सर्वस्मै दद्यात् । तथा सति सर्वं जगदेकरूपतया सुखमनुभवेत् । न कश्चन दुःख्येत् । न चैवं दृश्यते । तस्मात् कस्यचित्सुखं कस्यचिद्दुःखमित्यस्य दृश्यमानस्य दशाभेदस्य निर्निमित्तत्वे तत्कारिणो देवस्य वैषम्यनैर्घृण्ये प्रसज्येते इति दाशुषे भद्रं करोति नान्यस्मा इति व्यवस्थाऽवश्यमाश्रयणीयेति ।

करिष्यसि । यागफलस्य उत्तरकालभावित्वात् भविष्यद्रूपम् ॥ ६ ॥

प्रतिज्ञाता स्तुतिरवसिता । 'स्तव्यः स्तवप्रियः' इति प्रसिद्धो देवः कृतया स्तुत्या प्रीतः सन् 'कं ते कामं ददानि' इति ऋषिमपृच्छत् । तत्र स्वं काममुत्तरत्र प्रकाशयिष्यन् ऋषिः तादृशप्रार्थनोपयोगितया प्रथमं स्वाध्यवसायं युग्मेनाह—

उपत्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् ।
नमो भरन्त एमसि ॥ ७ ॥

राजन्तमध्वराणां गोपामृतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥ ८ ॥

इति । हे अग्ने हे दोषावस्तः रात्रिनाशक तमोपह त्वां वयं दिने दिने धिया ध्यानेन बुद्ध्या श्रद्धाभक्तियुक्तमित्यर्थः । नमो भरन्तः नमस्कारं कुर्वन्तः उपेमसि उपेमः उपगच्छामः ।

कीदृशं त्वाम् । राजन्तं दीप्यमानम् । स्वाभाविक्या दीप्त्या युक्तमिति । अन्यैः प्रधर्षयितुमशक्यं अत एवान्यतो रक्षामनपेक्षमाणमिति परमतात्पर्यम् । अध्वराणां यज्ञानां गोपां गोपयितारं रक्षकम् । ऋत्विजां प्रमादेन वा रक्षःप्रभृतिकृतोपघातेन वा प्रसजत् सर्वं वैगुण्यं परिहृत्य अध्वराणामध्वरत्वमापादयन्तमिति । ऋतस्य सुकृतस्य भूतस्य भविष्यतश्च दीदिविं अतिशयेन द्योतकम् । न खल्वग्न्याराधनं नामेदं श्रेष्ठतमं पुण्यकर्म असुकृतिनां कदाचिल्लभ्यम् । नापि तत् क्रियमाणं कदाचिद्विफलं भविष्यति । 'नेहाभिक्रमनाशोऽस्ति' इति न्यायात् । तस्मादाराध्यमानोऽग्निः आराधयितुर्भूतं भविष्यच्च महासुकृतकारित्वं ज्ञापयति । 'व्यनक्ति,कालत्रितयेऽपि योग्यताम्' इति माघोक्तिरत्र संवादिनी ॥ स्वे दमे वर्धमानम् । हविःसमृद्धिजनिता वृद्धिरिहाभिप्रेता । स्वे दमे स्वकीये स्थाने गृहे । नास्माकं स्वभूतं स्थानं गृहं वा किञ्चिदस्ति । सर्वमग्नेर्देवस्य स्वम् । अस्मास्वेव तस्य स्वभूतेषु अस्मदधीनं यत्किञ्चिद्वर्तते तत् तस्य स्वमिति किमिदं वक्तव्यमपि ।

उपत्वा । अतिसामीप्यं विवक्षन्निव अव्यवधानेन सामीप्यवाचिन उपसर्गस्य युष्मदश्च प्रयोगमाद्रियते ।

त्वाग्ने । अत्र 'यदङ्ग दाशुषे त्वमग्ने' इत्यत्र च युष्मदर्थस्फुटीकरणायैव तदनन्तरमेव सम्बुद्धिप्रयोगः ।

दिवे दिवे । दैनन्दिनिकमग्निहोत्रमभिप्रेत्येदमुच्यत इति मन्यन्ते । अत एव 'दोषावस्तः' इत्यस्य 'सायं प्रातश्च' इत्यर्थमाहुः । अग्निहोत्रस्य प्रतिदिनं कालद्वयेऽपि कर्तव्यत्वात् ।

दोषावस्तर्धिया । यथा त्वं निशायास्तमो नाशयसि तथा मम धियोऽपि तमो विनाश्य त्वदेकप्रवणतां सम्पादयेति अनयोः पदयोः समभिव्याहारस्याभिप्रायः ।

वयम् । यद्यपि स्तोतुमहमेक उद्यतः, तथाऽपि त्वयोपचरणेऽहमिव

मदनुबन्धिनः सर्वेऽप्यन्वयं भजन्ते। सर्व एव वयं तव किङ्कराः त्वदनुग्रह-पात्रभूताः । न त्वहमेक एव ।

नमः । यथावत् यज्ञोपयुक्तसर्वसम्भरणे वयमशक्ताः । नमस्कार एकस्तत्र सर्वन्यूनतापरिहारक इति साऽस्माकं गतिः ।

भरन्तः । अञ्जलिबन्धने नास्ति क्लेशः । तथाऽपि तदनुगुण-मनःपरिपाकस्य श्रमसाध्यत्वात् सोऽपि भर एव भवति ।

राजन्तमित्यादिना नमस्कार्यत्वोपयुक्ता गुणा उच्यन्ते । तत्र राजन्तमिति स्वतःसिद्धसर्वप्रकारदीप्तिमत्त्वकथनेन स्वार्थलेशनैरपेक्ष्यं, अनन्तर-विशेषणद्वयेन भूतभविष्यद्वर्तमानेषु त्रिष्वपि कालेषु महोपकारकत्वं अन्तिमेन सर्वस्वामित्वं च प्रतिपाद्यते ॥ ७-८ ॥

एवं स्वाध्यवसायं प्रकाश्य अध्यवसितार्थपूरणमेव त्वया कर्तव्यं नान्यदिति प्रार्थयते चरमेण मन्त्रेण-

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ ९ ॥

हे अग्ने उक्तसर्वगुणोपेतस्त्वं पितेव पुत्राय अस्मभ्यं सूपायनः सुख-नोपसर्पणीयो भव । सूनव इति षष्ठ्यर्थे वा चतुर्थी । पितेव सूनोरस्माकं सूपायनो भवेति । किञ्च अस्माकं स्वस्तये शोभनस्थितये सचस्व सहैव वर्तस्व । यद्वा स्वस्तये नः अस्मान् सचस्व भजस्व ।

पितेव । कृत्याकरणाकृत्यकरणापराधं क्षान्त्वा प्रीत्या सौमुख्यं प्रद-र्शनीयमित्युपमानार्थः ।

सूपायनः । व्याधौ, परिजनराहित्ये, दुर्भिक्षेण सम्भारदौर्लभ्ये, असकृज्ज्ञातिमरणाद्याशौचे, एवंविधेषु निमित्तान्तरेषु च अग्नेरुपसर्पणं विहतं भवति । तदा दुरुपायत्वहेतुभूतं सर्वं निग्रहसङ्कल्पं दूरं कृत्वा सूपायनत्वो-पयुक्तः प्रसादातिशयः प्रदर्शनीयः ।

सचस्व । 'यस्तित्याज सचिविदं सखायं' इति सचिशब्दः सख्यर्थे दृश्यते । तत्प्रकृतिश्चेदयं धातुः, सहैव सन् हितकारी भव, सखा भव इत्यर्थो लभ्येत । राष्ट्रक्षोभादिनिमित्तविशेषेण यदाकदाचिदपि धार्याग्नि-विच्छेदो मा भूदिति भावः ।

तदेवमग्नेः परिचरणं तत्प्रणमनमित्येतदतिरिक्तं ऋषेरभिलषणीयं पुरुषार्थान्तरं नासीदिति ज्ञायते । एतेन—

"शाश्वती मम संसिद्धिरियं ह्यहोभवामि यत् ।
पुरुषं परमुद्दिश्य न मे सिद्धिरितोऽन्यथा ॥"

"भवन्तमेवानुचरन्निरन्तरप्रशान्तनिश्शेषमनोरथान्तरः ।
कदाऽहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितः ॥"

"त्वं चेत्प्रसीदसि तवास्मि समीपतश्चेत्
त्वय्यस्ति भक्तिरनघा करिशैलनाथ ।
संसृज्यते यदि च दासजनस्त्वदीयः
संसार एष भगवन्नपवर्ग एव ॥"

इति वदद्भिः परमभागवतवेदान्तिकविभिः स्पष्टमेव प्राचीनानामृषीणामभिप्रायो विवृतो भवतीति सर्वेषां सुगमम् ।

इत्थं स्तुतिप्रतिज्ञा नूतनस्तुतियोग्यतासमर्थनं स्तुतिः स्वमनोरथः तत्पूरणप्रार्थनमित्येतदर्थकप्रकरणपञ्चकघटितमिदं नवर्चं ऋक्संहिताया आदिमं सूक्तं ग्रन्थतोऽल्पमपि सर्वशास्त्रार्थसारगर्भतया भक्तिरसात्मतया च काव्य-शास्त्रात्मकसर्वग्रन्थातिशायीति स्थितम् ॥

ब्रह्मसूत्रोदितन्यायवेदिनां भवति स्वयम् ।
अग्निरस्मिन् स्तुतः सूक्ते परमात्मेति निश्चयः ॥

विवक्षितार्थस्य यथोपलम्भे
तथा तदन्यस्य विवर्जनेऽपि
कृतावधानोऽस्म्यवशात् प्रसक्तं
न्यूनातिरिक्तं क्षमतां स देवः ॥

KENDRIYA SANSKRIT VIDYA PEETHA
TIRUPATI.
LIBRARY
91:9
N
605

